**दयावीर** पु॰ दयया वीरः। १दयार्थकृते वीरे रसे २तद्युक्ते नायकभेदे च सा॰ द॰ वीररसलक्षणमुक्त्वा “स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात्” स च दानवीरो धर्मवीरो दयावीरो युद्धवीरश्चेति चतुर्विधः” इति विभज्य “दयावीरो यथा जीमूतवाहनः। “शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति। तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात्त्वं विरतो गरुत्मन्” । एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः” उदाजहार।

**दयित** पु॰ दय–क्त। १पत्यौ अमरः। २प्रियमात्रे त्रि॰। ३भार्य्यायां स्त्री। “दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते” रसग॰। “न गजा नगजा दयिता दयिताः” भट्टिः।

**दयिलु** त्रि॰ दय–इलु। दयाशीले।

**दयू** त्रि॰ देव–क्विप् ऊठ्। देवनकर्त्तरि।

**दर** अव्य॰ दॄ–भये अप्। १ईषदर्थे। २भये, ३गर्त्ते च पुं न॰। अमरः “दरादराभ्यां दरकम्पिनी पपे” नैषधम् “दरमीलन्नयनानिरीक्षते” रसगङ्गा॰। “न जातहार्देन न विद्विषादरः” किरा॰। ४कन्दरे पुंस्त्री॰ स्त्रीत्वे ङीप्। “दरीगृहोत्सङ्गनिषक्तभासः”। “दरीमुखोत्थितेन समीरणेन” कुमा॰। ५शङ्खे शब्दार्थचि॰। “स उच्चकाशे धवलो दरोदरोऽप्युरुक्रमस्याधरशोणशोचिषा मेति” भाग॰। [ शब्दार्थचि॰।

**दरक** त्रि॰ दर+भये “कुल्वादिभ्यो वुन्” पा॰ वुन्। भीरौ

**दरकण्टिका** स्त्री दर ईषत् कण्टो यस्याः कप् कापि अत इत्वम्। शतावर्य्याम् राजनि॰।

**दरणि** पुंस्त्री दॄ–अनि। नद्यादेः कूलभङ्गे (भाङ्गन) शब्दार्थचि॰। स्त्रीत्वे वा ङीप्।

**दरथ** पु॰ दॄ–विदारे “दृणमिदमिभ्यश्च” उज्ज्वलदत्तधृतसूत्रात् अथ। १दिक्षु प्रसरणे २गर्त्ते च उज्ज्वलदत्तः।

**दरद्** स्त्री दॄ–विदारणे “शदृभसोऽदिः” उणा॰ अदि। १हृदये २कूले च उज्ज्वलद॰। दॄ–भये अदि। ३पर्वते ४प्रपाते ५भये च पु॰ मेदि॰। ६म्लेच्छजातौ अमरटीका।

**दरद** त्रि॰ दरं भयं ददाति दा–क दर ईषत् दायति शुध्यति दैप–शोधे–क वा। १भयदायके २हिङ्गुले पु॰ न॰ भावप्र॰ तद्भेदादिकमुक्तं यथा “हिङ्गुलं दरदं म्लेच्छमिङ्गुलञ्चूर्णपारदम्। दरदस्त्रिविधः प्रोक्तश्चर्मारः शुक्लतुण्डकः। हंसपादस्तृतीयः स्यादुणवानुत्तरोत्तरम्। चर्मारः शुक्लवर्णः स्यात् सपीतः शुक्लतुण्डकः। जवाकुसुमसङ्काशो हंसपादो महोत्तमः। तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि। हृल्लासकुष्ठज्वरकामलांश्च प्लीहामवातौ च गरञ्च हन्ति। ऊर्द्ध्वपातनयुक्त्या तु डमरुयन्त्रपाचितम्। हिङ्गुलं तस्य सूतन्तु शुद्धमेवं न शोधयेत्। ३देशभेदे पु॰ स च देशः वृ॰ स॰ १४ अ॰ ऐशान्यामुक्तः ऐशान्यामित्युपक्रमे अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः” “शूद्राभीराश्च दरदाः काश्मीराः पत्तिभिः सह” भा॰ भी॰ ६ अ॰। प्राच्योदीच्यदेशोक्तौ। सोऽभिजनोऽस्य तस्य राजा वा अण्। दारद पित्रादिक्रमेण तद्देशवासिनि तन्नृपे च। बहुषु अणो लुक्। “गृहीत्वा तु बलं सारं फाल्गुनः पाण्डुनन्दनः। दरदान् सह काम्बोजैरजयत् पाकशासनिः। प्रागुत्तरां दिशं ये च वसन्त्याश्रित्य दस्यवः। निवसन्ति वने ये च तान् सर्वानजयत् प्रभुः” भा॰ स॰ २६ अ॰। आर्षे क्वचिदेकत्वेऽपि अणो लुक्। “शाल्वराजश्च दरदो। विदेहाधिपतिस्तथा” हरिवं॰ ९१ अ॰। ४म्लेच्छजातिभेदे। ५भये शब्दरत्ना॰। ६शनैः क्रियालोपात् शूद्रत्वापन्ने क्षत्रियभेदे च। “शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः” इत्युपक्रमे “पारदापह्लवाश्चीनाः किराता दरदाः खशाः” मनुः।

**दरवर** प॰ दरेषु शङ्खेषु वरः। पाञ्चजन्ये भगवतः शङ्खे श्रीधरः। “दध्मौ दरवरं तेषां विषादं शमयन्निव” भाग॰ १।११।२।

**दरसान** पु॰ दॄ–विदारणे असानच्। द्योते उज्ज्वलद॰।

**दरि(री)** स्त्री दॄ–विदारे इन् वा ङीप्। १कन्दरे शब्दरत्ना॰। २तक्षककुलजे सर्पभेदे पु॰ “पूर्णाङ्गदः पूर्णमुखः प्रहासः शकुनिर्दरिः” भा॰ आ॰ ५७ अ॰।

**दरित** त्रि॰ दरो जातोऽस्य तार॰ इतच्। जातभये हेमच॰।

**दरिद्र** त्रि॰ दरिद्रा–क। १दुर्गते २निःस्वे अमरः। “प्रणीय दारिद्र्यदरिद्रतां नृपः” नैष॰। “स्त्रीबालोन्मत्तवृद्धानां दरिद्राणाञ्च रोगिणाम्” मनुः। दरिद्रत्वे हेतुः “अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च। अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते” प्रा॰ त॰। “दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः” भाग॰। “अयं पटः सूत्रदरिद्रतां गतः” मृच्छ॰।

**दरिद्रा** दुर्गतौ अदा॰ स्वपा॰ पर॰ अक॰ सेट्। दरिद्राति जक्षा॰ दरिद्रति अदरिद्रीत्–अदरिद्रासीत्। दरि-